# ST. JAMES SENIOR SCHOOLS

# SANSKRIT COURSE

## BOOK THREE

(YEARS 10 AND 11)

*NOTE: These are older books. The Hitopadesha Stories included here are not the current Set Literature Texts. For the literature required for the current IGCSE examination, please refer to the IGCSE Literature Study Aid.*

updated June 2018

# ST JAMES SENIOR SCHOOL SANSKRIT COURSE
## BOOK THREE

## INTRODUCTION

This book, designed to follow on from the Senior School Course, Book Two, supplies the material for the last year of the Senior School Course, for pupils of age 14 – 15+ years. The last term or so of the Course preceding the main examinations is to be spent in general revision, (sandhi, vocabulary, English to Sanskrit, etc.), and the practice of Past Papers.

For the Set Text IGCSE literature, please refer to the current Literature Study Aid.

The **Epic Civilization Course** begins this term. This course outlines some of the main principles embodied in the Sanskrit tradition. A separate textbook is available for the purpose of this study. The material is studied a little at a time through the term, the same day each week with a test to follow. This material lends itself to being read by the teacher while the class follows in their own copies, with frequent breaks for discussion of not too lengthy a kind.

**For vocabulary and sandhi summary, please refer to Book 2 and the current IGCSE vocabulary list.**

# ST. JAMES SANSKRIT COURSE

## INDEX

**YEAR 10/11 Age 14 -15**


Term One

- (Epic Civilization Course Ch. 1)
- अभ्यास (doubling) p 5
- लिट् The Perfect Tense p 6
- **Hitopadeśa** Story (Rabbit & Lion, Crows & Serpent) p 7
- Survey of Verbs p 13
- Development of धातु (Root words) Charts & Tests p 15
- English to Sanskrit Sentences, Sheet 6 p 22

Term Two

- **Hitopadeśa** Stories 4 - 6 p 24
- The Use of the Case Endings p 31
- Indeclinables + Notes p 44
- (Epic Civilization Ch.2&3)
- Metre, Stress and notes on श्लोक (verse form) p.47
- Replacement of न् to ण् & स् with ष् etc. p.48

Term Three

- Revision of Sandhi
- (Epic Civilization Ch. 4 & 5) p.49

## ॥ अथ अभ्यासः ॥

The process called अभ्यास (or sometimes just 'doubling') takes place according to the following general rules (some more specific rules are not mentioned):

a) The **dhātu** is doubled. The first of the two is called the अभ्यास.

b) Only the first consonant of the अभ्यास remains.
[Thus भाष् भाष् > भभाष् / कुप् कुप् > कुकुप् ]

c) If the vowel of the अभ्यास is long, it is replaced by a short measure.
[Thus दा दा > ददा ]

d) In the अभ्यास a झष् is replaced by its nearest जश् (ज् ब् ग् ड् or द्)

[Thus धधा (**dhātu** धा+ अभ्यास) > दधा
and भभाष् > बभाष्]

The following are a few examples of धातु's which in लिट् (the perfect) take अभ्यास. The first case singular form is given after each **dhātu**. *[These should be learnt for a test.]*

| | | | | | |
|---|---|---|---|---|---|
| * कृ | चकार | Made / Did | * ज्ञा | जज्ञौ | Knew |
| * पत् | पपात | Fell | * दृश् | ददर्श | Saw |
| * गम् | जगाम | Went | * या | ययौ | Went |
| * हन् | जघान | Killed | * कुप् | चुकोप | Was angry |
| * भू | बभूव | Became | * शुच् | शुशोच | Grieved |
| * वच् | उवाच | Said | * श्रु | शुश्राव | Heard |
| * दा | ददौ | Gave | * भाष् | बभाषे | Said |

* The forms of the perfect, लिट्, (बभूव and बभाषे, on the final page of रूपाणि Bk.2) should be learnt for a test.

## ॥ अथ लिट् PAST PERFECT ॥

लिट् like लङ् , speaks of the Past , but not of the same day nor witnessed by the speaker himself.

We now know six ways of expressing the **Past** :

i) रामो वनं गच्छति स्म ॥ ( स्म changes the Tense to the Past )

ii) रामो वनमगच्छत् ॥ ( Verb, Past Tense, लङ्, paradigm **अभवत्**.)

iii) रामो वनं गतः ॥ (गत is a 'ta' ending word.)

iv) रामो वनं गतवान् ॥ (गतवान् is a 'tavat' ending; uses '**dhīmat**' endings.)

v) रामो वनं जगाम ॥ ( लिट् , called the 'perfect'; refer to **बभूव** or **बभाषे**.)

vi) रामेण वनमगम्यत ॥ ( Passive verb , Past Tense paradigm अलभत.)

HITOPADESA STORY.

**THE CROW AND THE SERPENT & THE LION, RABBIT AND WELL.**

**PART ONE**

1. कस्मिंश्चित्तरौ वायसदंपती निवसतः। 2. तयोश्चापत्यानि तरुकोटरावस्थितकृष्ण सर्पेण खादितानि। 3. ततः पुनर्गर्भवती वायसी ब्रूते। 4. स्वामिन्। त्यज्यतामयं तरुः। 5. अत्र यावत्कृष्णसर्पस्तावदावयोः संततिः कदा चिदपि न भविष्यति।

6. यतः।

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः।

ससर्पे च गृहे वासो मृत्युरेव न संशयः॥

| | | |
|---|---|---|
| तरु tree | वायसी female crow | |
| वायस° crow | गर्भवती pregnant | भृत्य° servant |
| दंपती husband and wife | त्यज्यताम् let us leave | उत्तरदायकः answering back |
| आपत्य° offspring | संततिः continuation(of family) | स- with |
| कोटरम् hole | दुष्ट° wicked | वासः living |
| अवस्थित° living | शठ° deceitful | संशयः doubt |
| कृष्णसर्पः cobra | | |

*[NOTE: Book 2 Vocabulary will need to be referred to for the meaning of some of the words.]*

**<u>THE CROW AND THE SERPENT & THE LION, RABBIT AND WELL.</u>**

PART TWO

7. वायसो ब्रूते। 8. प्रिये। न <u>भेतव्यम्</u>। 9. <u>वारं</u> वारं मयैतस्य महापराधः <u>सोढः</u>। 10. इदानीं पुनर्न <u>क्षन्तव्यः</u>। 11. वायस्याह। <u>कथम</u>नेन <u>बलवता</u> कृष्ण-सर्पेण <u>सार्धं</u> भवा<u>न्विग्रहीतुं</u> समर्थः। 12. वायसो ब्रूते। 13. अलमनया चिन्तया। 14. यतः।

यस्य <u>बुद्धि</u>र्बलं तस्य <u>निर्बुद्धे</u>स्तु <u>कुतो</u> बलम्।
वने सिंहो बलो<u>न्मत्तः</u> शशकेन <u>निपातितः</u>॥

| | | |
|---|---|---|
| भेतव्यम् should be feared | क्षन्तव्य° to be endured | बुद्धिः intelligence |
| वारम् time | बलवत् strong | निर्बुद्धि° unintelligent |
| सोढः borne | सार्धम् along with | कुतः from where? |
| कथम how? | विग्रहीतुम् to fight | उन्मत्तः maddened |
| | | निपातित° overthrown |

## THE CROW AND THE SERPENT & THE LION, RABBIT AND WELL.

PART THREE

15. वायस्याह। 16. कथमेतत्। 17. वायसः कथयति। 18. अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः। 19. स च सर्वदा पशूनां वधं विदधान एवास्ते। 20. ततः सर्वैः पशुभिर्मेलकं कृत्वा स सिंहो विज्ञप्तः। 21. देव। किमर्थं सर्वपशुवधः क्रियते। 22. वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः। 23. सिंहेनोक्तम्। 24. यद्येतदभिमतं भवतां तर्हि भवतु। 25. ततः प्रभृति प्रत्यहमेकैकं पशुमुपकल्पितं भक्षयन्नास्ते। 26. अथ कदाचित्कस्यापि वृद्धशशकस्य वासरः प्राप्तः। 27. ततः सोऽचिन्तयत्।

विदधान° being engaged

पशुः animal

वधन् killing

मेलकः assembly

किमर्थम् why?, for what purpose?

उपढौकयामः we will present

अभिमत° agreeable

भक्षयन् he, eating

प्रभृति from then onwards

वासरः turn

प्राप्तः arrived

**THE CROW AND THE SERPENT & THE LION, RABBIT AND WELL.**

PART FOUR

28. त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया ।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे ॥

29. तन्मन्दं मन्दमुपगच्छामि। 30. ततः सिंहो ऽपि क्षुधा पीडितः
कोपात्तमुवाच। 31. कुतस्त्वं विलम्ब्यागतो ऽसि। 32. शशको ऽब्रवीत्।
नाहमपराद्धः। 33. पथि सिंहान्तरेण बलाद्धृतस्तस्याग्रे पुनरागमनाय शपथं
कृत्वा स्वामिनं निवेदयितुमत्रागतो ऽस्मि। 34. सिंहः सकोपमाह।
35. सत्वरं गत्वा मां दर्शय। 36. क्वासौ दुरात्मा तिष्ठति। 37. ततः
शशकस्तं गृहीत्वा गम्भीरकूपसमीपं गतः।

| | | |
|---|---|---|
| विनीतिः modesty | विलम्ब्य having loitered | निवेदयितुम् to inform |
| अशया with hope | अपराद्ध° guilty | सकोपम् angrily |
| अनुनयः civility | पथ् path | दर्शय show |
| तद् then | शपथः oath | गम्भीर° deep |
| अपि for his part | | |
| क्षुध् hunger | | |

**THE CROW AND THE SERPENT & THE LION, RABBIT AND WELL.**

PART FIVE

38. अत्रागत्य पश्यतु स्वामीत्युक्त्वा तस्मिन्कूपजले तस्यैव प्रतिबिम्बं

दर्शितवान्। 39. ततो ऽसौ दर्पाध्मातस्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः।

40. अतो ऽहं ब्रवीमि। 41. यस्य बुद्धिर्बलं तस्येत्यादि।

42. वायसी ब्रूते। 43. श्रुतं मया। 44. कर्तव्यतां ब्रूहि। 45. वायसो ऽवदत्।

46. प्रिये। आसन्ने सरसि राजपुत्रः सततमागत्य स्नाति। 47. तस्मिन्प्रस्तरे

तदङ्गादवतारितं कनकसूत्रं चञ्च्वा धृत्वानीयास्मिन्कोटरे धरिष्यसि।

| | | |
|---|---|---|
| दर्शितवान् showed | सततम् always | कनक° gold |
| आध्मात° puffed up | स्नाति bathes | सूत्रम् thread |
| वायसी female crow | प्रस्तरः rock | चञ्चुः beak |
| कर्तव्यताम् what is to be done | अवतारित° taken off | धरति places |
| आसन्ने nearby | | |

## THE CROW AND THE SERPENT & THE LION, RABBIT AND WELL.

PART SIX

48. अथ कनकसूत्रानुसरणप्रवृत्तै राजपुरुषैः कोटरे निरूप्यमाणे कृष्णसर्पो

द्रष्टव्यो व्यापादयितव्यश्च। 49. अथ कदाचित्स्नातुं प्रविष्टे राजपुत्रे वायस्या

तदनुष्ठितम्। 50. तथानुष्ठिते तद्वृत्तम्। 51. अतो ऽहं ब्रवीमि।

उपायेन हि तत्कुर्याद्यन्न शक्यं पराक्रमैः ।

काक्या कनकसूत्रेण कृष्णसर्पो निपातितः ॥

| | | | | | |
|---|---|---|---|---|---|
| अनुसरण° | seeking for | प्रविष्ट° | entered | शक्यम् | possible |
| प्रवृत्त° | came about | अनुष्ठित° | executed | पराक्रमः | valour |
| निरूप्यमाण° | being discovered | वृत्त° | brought about | काकी | she-crow |
| स्नातुम् | to bathe | कुर्यात् | one may do | निपातितः | killed |

NOTE:

* *The following two pages should be studied in conjunction with the 2 paradigm Books in preparation for a major test on verbs.*

# SURVEY OF VERBS

*Below, the general meaning and examples of the most common verbal forms are given. The complete system for each, should be revised from the two Paradigm Books [Bk.1 pp 4, 5, 9 & 15 ; Bk.2 pp 6, 8 & 10 ] in preparation for a major test.*

*[NOTE: In the examples that follow (except for the Imperative ), the First Person forms are given, followed by the singular form of the Second and Third Persons.]*

1. PRESENT (लट्) ॥ Also used at times for future and, with स्म for the Past.

   examples: अस्ति स्तः सन्ति / असि / अस्मि etc.

   करोति कुरुतः कुर्वन्ति / करोषि / करोमि etc.

   भवति भवतः भवन्ति / भवसि / भवामि etc.

   and

   लभते लभेते लभन्ते / लभसे / लभे etc.

2. FUTURE (लृट्) ॥ This adds स्य or इष्य before the Present endings.

   examples: भविष्यति , दास्यति , लप्स्यते .

3. PAST (लङ्) ॥ (But not on the same day.)

   examples: अभवत् अभवताम् अभवन् / अभवः / अभवम् etc.

   अकरोत् अकुरुताम् अकुर्वन् / अकरोः / अकरवम् etc.

   आसीत् आस्ताम् आसन् / आसीः / आसम् etc.

   and

   अलभत अलभेताम् अलभन्त / अलभथाः / अलभे etc.

SURVEY OF VERBS (continued).

4. IMPERATIVE (लोट्) ‖ This is used in two ways :

a) as a direct command (e.g. गच्छ Go! )

b) as a polite request (e.g. रामः गच्छतु Let **Rāma** go. )

examples : भवतु भवताम् भवन्तु / polite request

भव भवतम् भवत / direct command

and

लभताम् लभेताम् लभन्ताम् / polite request

लभस्व लभेथाम् लभध्वम् / direct command

NOTE: Other common forms are शृणु , एहि , देहि , कुरु etc..

5. OPTATIVE (विधि लिङ्) ‖ Used to express 'should', 'would', or 'might', do something.

examples : स्यात् (It should be) स्याताम् स्युः etc.

भवेत् भवेताम् भवेयुः / भवेः / भवेयम् etc.

कुर्यात् कुर्याताम् कुर्युः / कुर्याः / कुर्याम् etc.

and

लभेत् लभेयाताम् लभेरन् / लभेथाः / लभेय etc.

6. PERFECT (लिट्) ‖ This also is Past. There is doubling (अभ्यासः) of the **dhātu**.

examples : बभूव बभूवतुः बभूवुः / बभूविथ / बभूव etc.

जगाम जग्मतुः जग्मुः / जग्मिथ / जगाम etc.

चकार चक्रतुः चक्रुः / चकर्थ / चकार etc.

*[NOTE: For the purposes of the following test the meanings of the various **dhātus** to be used are given below:*

*दा give / गम् go / कृ do or make / भू become / लभ् find / भाष् speak (verbal form is like 'labhate').]*

# THE DEVELOPMENT OF A धातु

The following charts set out the development of some of the most important धातुs. The arrangement is in the order of the ten families (गणाः) of धातुs and gives the following details:

***COLUMNS:***

a) ***The dhātu*** with an indication of its realm of meaning.

b) ***The Present form in Active and Passive*** (First Person Singular).

In general, the form of the **dhātu** in the Present Active demonstrates the form that will also be taken in the Past, the Imperative, the Optative and by the Present Participle. This is illustrated in brackets for the first two **dhātus** on Sheet 1 which are chosen to show the typical development for the basic verbal forms (in the two active voices, as for भवति & लभते) .

c*) **The Future form*** (First Person Singular).

d) ***The Perfect form*** (First Person Singular).

e) ***The कृत्य forms***. These are usually of the 'तव्य°' sort unless otherwise indicated.

f) ***The Infinitive.***

g*) **The त and त्वा ending forms***.

*[Tests should be given on each page of the charts and also a major test on the whole 5 pages.]*

**धातु CHART EXAMPLE:**

**FIRST FAMILY**

| धातु & realm of meaning | Present <u>Active & Passive</u> | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| पत्<br>'in falling'<br>(typical 'bhavati' form) | पतति he falls<br>पत्यते he is fallen<br>(अपतत् he fell<br>पततु let him fall<br>पतेत् he should fall<br>पतन् he, falling ) | पतिष्यति<br>he will fall | पपात<br>he fell | पति-तव्य॰<br>to be, or should be, fallen | पतितुम्<br>to fall | पतित॰<br>fallen<br>पतित्वा<br>having fallen |
| भाष्<br>'in saying'<br>(typical 'labhate' form) | भाषते he says<br>भाष्यते it is said<br>(अभाषत he said<br>भाषताम् let him say<br>भाषेत he should say<br>भाषमाण॰ saying | भाषिष्यते<br>he will say | बभाषे<br>he said | भाष्य॰<br>to be, or should be, said | भाषितुम्<br>to say | भाषित॰<br>said<br>भाषित्वा<br>having said |

Use this page as a reference as we move on through the following charts.

**FIRST FAMILY** (cont.)

| धातु & realm of meaning | Present Active& Passive | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| गम् in going | गच्छति / गम्यते | गमिष्यति | जगाम | गन्तव्य° | गन्तुम् | गत°/ गत्वा |
| गै in singing | गायति / गीयते | गास्यति | जगौ | गेय° | गातुम् | गीत°/ गीत्वा |
| जि in conquering | जयति / जीयते | जेष्यति | जिगाय | जेय° | जेतुम् | जित°/ जित्वा |
| तॄ in crossing over | तरति / तीर्यते | तरिष्यति | ततार | तरनीय° | तरितुम् | तीर्ण°/ तीर्त्वा |
| त्यज् in abandoning | त्यजति / त्यज्यते | त्यक्ष्यति | तत्याज | त्यक्तव्य° | त्यक्तुम् | त्यक्त°/ त्यक्त्वा |
| दृश् in seeing | पश्यति / दृश्यते | द्रक्ष्यति | ददर्श | द्रष्टव्य° | द्रष्टुम् | दृष्ट°/ दृष्ट्वा |
| नी in leading | नयति / नीयते | नेष्यति | निनाय | नेतव्य° | नेतुम् | नीत°/ नीत्वा |
| पा in drinking | पिबति / पीयते | पास्यति | पपौ | पनीय° | पातुम् | पीन°/ पीत्वा |
| भू in becoming | भवति / भूयते | भविष्यति | बभूव | भवितव्य° | भवितुम् | भूत°/ भूत्वा |
| लभ् in finding | लभते / लभ्यते | लप्स्यते | लेभे | लभ्य° | लब्धुम् | लब्ध°/लब्ध्वा |
| वद्* in speaking | वदति / उद्यते | वदिष्यति | उवाद | वदितव्य° | वदितुम् | उदित°/उदित्वा |
| स्था in staying still | तिष्ठति / स्थीयते | स्थास्यति | तस्थौ | स्थातव्य° | स्थातुम् | स्थित°/स्थित्वा |
| हृ** in taking | हरति / ह्रियते | हरिष्यति | जहार | हर्तव्य° | हर्तुम् | हृत°/ हृत्वा |

* वस् develops similarly    ** धृ in holding, develops similarly.

Other members of the first family:

अर्च् अर्चति worships    खाद् खादति eats    जीव् जीवति lives    रक्ष् रक्षति protects    वृध् वर्धते grows

कम्प् कम्पते shakes    चर् चरति walks    दह् दहति burns    रुह् रोहति ascends    हस् हसति laughs

धाव् धावति runs    नम् नमति bows    पठ् पठति reads    वृत् वर्तते exists

**SECOND FAMILY**

| धातु & realm of meaning | Present <u>Active& Passive</u> | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| आस् in sitting, existing | आस्ते / आस्यते | आसिष्यते | | आस्य° | आसितुम् | आसित°/आसित्वा |
| ई in going | एति / ईयते | एष्यति | इयाय | एतव्य° | एतुम् | इत°/ इत्वा |
| या* in going | याति / यायते | यास्यति | इयाय | यातव्य° | यातुम् | यात°/यात्वा |
| वच् in speaking | वक्ति / उच्यते | वक्ष्यति | उवाच | वक्तव्य° | वक्तुम् | उक्त° / उक्त्वा |
| विद् in knowing | वेत्ति / विद्यते | वेदिष्यति | विवेद | वेदितव्य° | वेदितुम् | विदित°/विदित्वा |
| हन् in killing | हन्ति / हन्यते | हनिष्यति | जघान | हन्तव्य° | हन्तुम् | हत°/ हत्वा |

* भा in shining, is similar.

Other 2nd family dhātus: अस् अस्ति is, स्वप् स्वपति sleeps.

**THIRD FAMILY**

| धातु & realm of meaning | Present <u>Active & Passive</u> | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| दा* in giving | ददाति / दीयते | दास्यति | ददौ | दातव्य° | दातुम् | दत्त°/ दत्त्वा |
| भी in being afraid | बिभेति / भीयते | भेष्यति | बिभाय | भेतव्य° | भेतुम् | भीत° / भीत्वा |

* धा **in placing** , is similar.

**FOURTH FAMILY**

| धातु & realm of meaning | Present <u>Active& Passive</u> | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| जन् in being born | जायते / जन्यते | जनिष्यते | जज्ञे | जनितव्य॰ | जनितुम् | जात॰/ जात्वा |
| नश् in perishing | नश्यति / नश्यते | नशिष्यते | ननाश | | नशितुम् | नष्ट॰/नष्ट्वा |
| मन् in thinking | मन्यते | मंस्यते | मेने | मन्तव्य॰ | मन्तुम् | मत्त॰/मत्त्वा |
| युध्* in fighting | युध्यते | योत्स्यति | युयुधे | योद्धव्य॰ | योद्धुम् | युद्ध॰/युद्ध्वा |

* बुध् **in awakening**, is similar.

Other fourth family examples:

तुष् तुष्यति contented

नृत् नृत्यति dances

भ्रम् भ्राम्यति wanders

**FIFTH FAMILY**

| धातु & realm of meaning | Present <u>Active& Passive</u> | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| आप् in obtaining | आप्नोति / आप्यते | आप्स्यति | आप | आप्तव्य॰ | आप्तुम् | आप्त॰/आप्त्वा |
| शक् in being able | शक्नोति / शक्यते | शक्ष्यति | शशाक | शक्य॰ | शक्तुम् | शक्त॰/शक्त्वा |
| श्रु in hearing | शृणोति / श्रूयते | श्रोष्यति | शुश्राव | श्रोतव्य॰ | श्रोतुम् | श्रुत॰/ श्रुत्वा |

Other fifth family dhātus: वृ वृणोति or वृणुते **chooses**.

## SIXTH FAMILY

| धातु & realm of meaning | Present Active& Passive | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| इष् in wanting | इच्छति / इष्यते | एषिष्यति | इयेष | एषितव्य° | एषितुम् | इष्ट°/ इष्ट्वा |
| प्रच्छ् in questioning | पृच्छति / पृच्छ्यते | प्रक्ष्यति | पप्रच्छ | | प्रष्टुम् | प्रष्ट°/ प्रष्ट्वा |
| मुच् in releasing | मुञ्चति / मुच्यते | मोक्ष्यति | मुमोच | मोक्तव्य° | मोक्तुम् | मुक्त°/ मुक्त्वा |
| मृ in dying | म्रियते | मरिष्यति | ममार | मर्तव्य° | मर्तुम् | मृत°/ मृत्वा |

Other sixth family dhātus:

क्षिप् क्षिपति throws

तुद् तुदति hits

मिल् मिलति meets

लिख् लिखति writes

सृज् सृजति emits forth

स्पृश् स्पर्शति touches

## SEVENTH FAMILY

| धातु & realm of meaning | Present Active& Passive | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| भुज् in enjoying | भुङ्क्ते / भुज्यते | भोक्ष्यति | बुभोज | भोक्तव्य° | भोक्तुम् | भुक्त°/भुक्त्वा |
| युज् in joining | युनक्ति / युज्यते | योक्ष्यति | युयोज | योक्तव्य° | योक्तुम् | युक्त°/ युक्त्वा |

## EIGHTH FAMILY

| | | | | | | |
|---|---|---|---|---|---|---|
| कृ in doing/ making | करोति or कुरुते / क्रियते | करिष्यति | चकार चक्रे | कर्तव्य° | कर्तुम् | कृत° /कृत्वा |

Other similar dhatus : तन् तनोति spreads

**NINTH FAMILY**

| धातु & realm of meaning | Present Active& Passive | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| ग्रह् in grasping | गृह्णाति / गृह्यते | ग्रहिष्यति | जग्राह | ग्रहितव्य॰ | ग्रहितुम् | गृहीत॰/ग्रहीत्वा |
| ज्ञा in knowing | जानाति / ज्ञायते | ज्ञास्यति | जज्ञौ | ज्ञातव्य॰ | ज्ञातुम् | ज्ञात॰/ ज्ञात्वा |
| बन्ध् in binding | बध्नाति / बध्यते | भन्त्स्यति | बबन्ध | बद्धव्य॰ | बद्धुम् | बद्ध॰/ बद्ध्वा |

**TENTH FAMILY**

| धातु & realm of meaning | Present Active& Passive | Future | Past Perfect | कृत्य | Infinitive | त / त्वा |
|---|---|---|---|---|---|---|
| कथ् in telling | कथयति / कथ्यते | कथयिष्यते | | कथितव्य॰ | कथितुम् | कथित॰/कथयित्वा |
| चिन्त् in thinking, knowing. | चिन्तयति / चिन्त्यते | चिन्तयिष्यति | | चिन्तनीय॰ | चिन्तयितुम् | चिन्तित॰/ चिन्तयित्वा |

Other tenth family dhātus:

क्षल् क्षालयति washes

दण्ड् दण्डयति punishes

पूज् पूजयति worships

ENGLISH to SANSKRIT SENTENCES Sheet 6

[First look up the following words: शस्त्रम् भ्रातृ पत्नी शाला पृच्छति मृगः द्वारम् बलम् अरुण° उद्यानम् कामः केशः आश्रमः साधु° प्रतिदिनम् ]

Translate each sentence into Sanskrit, then put each into sandhi.

1. “Is someone in the room?" he asked

2. In this forest you should not say anything.

3. The scriptures should be heard by good-people every-day.

4. While the town was gone to by the brothers, the wives stayed in the hermitage.(Use locative absolute)

5. Whenever **Rāma** saw the deer, it went among the trees again.

6. Sometimes even sages came to see him.

7. The man-from-town ran according-to-strength.

ENGLISH to SANSKRIT SENTENCES Sheet 6 (cont.)

8. He saw the man going to the palace door.

9. They saw one-with-red-hair walking in the garden.

10. The great-forest is always filled with trees-flowers-lions-deer-and-monkeys.

# HITOPADEŚA STORIES 4 – 6

## (For practice only. For exam literature please see the latest Literature Study Aid)

## The story of a lion, a mouse and a cat

| | |
|---|---|
| उत्तरापथम् | northern region |
| शिखरः | peak |
| विक्रमः | courage |
| कन्दरः | cave |
| अधिशयान° | sleeping in |
| केसरः | mane |
| कश्चित् | some or other |
| छिनत्ति | nibbles |
| लून° | nibbled |
| बुद्ध्वा | having become aware |
| विवरः | hole |
| अन्तर्गत° | gone outside |
| अलभमान° | not finding |
| विधेय° | to be done |
| भवतु | so be it |
| क्षुद्र° | insignificant |
| भवेत् | might be |
| नम्यते | is bowed, overcome |
| निहन्तुम् | to kill |
| पुरस्कार्य° | should be put before |
| सदृश° | equal |
| आलोच्य | having considered |
| दधिः | milk or yoghurt |
| मांसम् | meat |
| संतोष्य | having satisfied |
| प्रयत्नात् | carefully |
| निःसरति | comes out |
| अक्षत° | not harmed |
| सविशेषम् | especially |
| संवर्धयति | makes happy |
| संचरन् | going |
| मार्जारः | cat |
| प्राप्त° | caught |
| अनन्तरम् | after that |
| उपयोगः | use |
| अभावः | absence |
| मन्दादर° | neglectful |
| निरपेक्ष° | free from need |
| कर्तव्य° | to be done |
| भृत्यः | servant |
| प्रभुः | master |
| स्यात् | would be |
| -वत् (end of a compound) | like |

## The Lion, the Mouse and the Cat

अस्त्युत्तरापथे ऽर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः । तस्य पर्वतकन्दरमधिशयानस्य केसराग्रं मूषिकः कश्चिच्छिनत्ति । स सिंहः केसराग्रं लूनं बुद्ध्वा कुपितो विवरान्तर्गतं मूषिकमलभमानो ऽचिन्तयत् । किं विधेयमत्र । भवतु । एवं श्रूयते ।

क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्न स नम्यते ।
तं निहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥

इत्यालोच्य तेन ग्रामं गत्वा दधिकर्णनामा बिडालो मांसाद्याहारेण संतोष्य प्रयत्नादानीय स्वकन्दरे धृतः । ततस्तद्भयान्मूषिको बहिर्न निःसरति । तेनासौ सिंहो ऽक्षतकेसरः सुखं स्वपिति । मूषिकशब्दं यदा यदा शृणोति तदा तदा सविशेषं तं बिडालं मांसाहारदानेन संवर्धयति । अथैकदा स मूषिकः क्षुधा पीडितो बहिः संचरंस्तेन मार्जारेण प्राप्तो व्यापादितः खादितश्च । अनन्तरं स सिंहो यदा कदाचिदपि मूषिकशब्दं न शुश्राव तदोपयोगाभावात्तस्य बिडालस्याहारदाने मन्दादरो बभूव । अतो ऽहं ब्रवीमि ।

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदा चन ।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत् ॥

# The story of the birds and the apes

| | | | |
|---|---|---|---|
| नर्मदा | the river Narmadā | -मात्र° | only, merely (at the end of a compound) |
| उपत्यका | the land at the foot of a mountain | आहृत° | brought |
| शाल्मली | a tall, thorny tree with red flowers | संयुक्त° | provided with |
| निर्मित° | made, formed | अवसीदति | becomes disheartened |
| नीडम् | nest | अमर्षः | impatience, anger |
| क्रोडः | hollow | आलोचित° | thought |
| पक्षिन् (m) | bird | निर्वात° | sheltered from the wind |
| वर्षाः | the rains | गर्भः | interior |
| पटः | garment | नन्दिति | blames |
| जलधरः | raincloud | उपशमः | stopping |
| पटलः | veil | शान्त° | ceased |
| आवृत° | covered | पानीयवर्षः | shower of rain |
| नभस्तलम् | sky | आरुह्य | having climbed |
| धारासारः | downpour | भग्न° | destroyed |
| वृष्टिः (f) | rain | अण्डम् | egg |
| वानरः | monkey | विद्वान् | learned man |
| -तले | under (at the end of a compound) | उपदेष्टव्य° | to be advised |
| अवस्थित° | standing, placed | उपदिशति | advises |
| शीत° | cold | अज्ञ° | foolish |
| आर्त° | afflicted | स्थानम् | abode, dwelling |
| अवलोक्य | having seen | भ्रंशः | ruin |
| भो भो | Oh! Oh! | ययुः | they went (perfect of याति) |

**The story of the birds and the apes**

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः । तत्र निर्मितनीडक्रोडे पक्षिणः सुखेन वर्षास्वपि निवसन्ति । अथ नीलपटैरिव जलधरपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव ।ततो वानरांस्तरुतलेऽवस्थिताञ्शीतार्तान्कम्पमानानवलोक्य पक्षिभिरुक्तम् । भो भो वानराः । श्रूयताम् ।

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः ।

हस्तपादादिसंयुक्ता यूयं किमवसीदथ ॥

तच्छ्रुत्वा वानरैर्जातामर्षैरालोचितम् । अहो । निर्वातनीडगर्भावस्थिताः सुखिनः पक्षिणोऽस्मान्निन्दन्ति । तद्भवतु । तावद्वृष्टेरुपशमः । अनन्तरं शान्ते पानीयवर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीडा भग्नाः। तेषां पक्षिणामण्डानि चाधः पतितानि । अतोऽहं ब्रवीमि ।

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदा चन ।

वानरानुपदिश्याज्ञान्स्थानभ्रंशं ययुः खगाः ॥

# The priest with the goat, and the three rogues

| | | | |
|---|---|---|---|
| गौतम° | Gautama, name of a forest | अनन्तरम् | straight away |
| प्रस्तुत° | begun | क्रोशमात्र° | calling distance |
| ब्राह्मणः | priest | अवस्थित° | standing near, placed |
| छागः | goat | आकर्ण्य | having heard |
| उपक्रीय | having bought | निधाय | having put down |
| स्कन्धः | shoulder | मुहुर्मुहुः | repeatedly |
| धूर्तः | rogue | निरीक्ष्य | having examined |
| त्रयम् | triad, three of | दोलायमान° | wavering, doubting |
| अवलोकित° | (was) seen | चलित° | set off, departed |
| मतिः (f.) | thought, wit | तदनन्तरम् | thereupon |
| प्रकर्षः | superiority | निश्चितम् | certainly, decidedly |
| प्रान्तरम् | a long road | स्नात्वा | having bathed |
| -तले | under (at the end of a compound) | ययौ | he went (perfect of याति) |
| वर्त्मन् (n.) | roadway | नीत्वा | having (been) led, or brought |
| स्थित° | stayed, waited | भक्षित° | (was) eaten |
| अभिहित° | said | औपम्यम् | likeness |
| किमिति | why | वेत्ति | knows, considers |
| उह्यते | is carried | वादिन् | speaker |
| श्वन् | dog | वञ्च्यते | is deceived |

**<u>The priest with the goat, and the three rogues</u>**

अस्ति गौतमारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः । स च यज्ञार्थं ग्रामान्तराच्छागमुपक्रीय स्कन्धे कृत्वा गच्छन्धूर्तत्रयेणावलोकितः । ततस्ते धूर्ता यद्येष च्छागः केनाप्युपायेन प्राप्य खाद्यते तदा मतिप्रकर्षो भवतीत्यालोच्य प्रान्तरे वृक्षत्रयतले ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः । तत्रैकेन धूर्तेन स ब्राह्मणो गच्छन्नभिहितः । भो ब्राह्मण । किमिति त्वया कुक्कुरः स्कन्धेनोह्यते । ब्राह्मणो ब्रूते । नायं श्वा । यज्ञच्छागो ऽयं । अनन्तरं पुनर्द्वितीयेन क्रोशमात्रावस्थितेन तदेवोक्तम् । तदाकर्ण्य ब्राह्मणस्तं छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः । तदनन्तरं पनर्गच्छन्स ब्राह्मणस्तृतीयेन धूर्तेनोक्तः । भो ब्राह्मण । किमिति कुक्कुरं स्कन्धेन भवान्वहति । तदाकर्ण्य निश्चितमेवायं कुक्कुर इति मत्वा छागं त्यक्त्वा स्नात्वा स्वगृहं ययौ । स च्छागो तैर्धूर्तैर्नीत्वा भक्षितः । अतो ऽहं ब्रवीमि ।

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स तथा वञ्च्यते धूर्तैर्ब्राह्मणश्छागतो यथा ॥

# THE USES of the CASE ENDINGS

## I The Uses of the First Case:

a The First Case is used to state the existence of something and its name.

eg रामायणम् , भगवद्गीता

b In a sentence with an active verb, the first case is used to identify the 'doer'.

1. रामः सीतां पश्यति ।

* ________________________________________

2. राजा धर्ममाचरेत् ।

* ________________________________________

c In a sentence with a passive verb, the first case is used to identify the object.

3. सीता रामेण दृश्यते ।

* ________________________________________

4. राक्षसा लक्ष्मणेन व्यापादिताः ।

*________________________________________

d The First Case ending is used with भू (eg भवति), अस्, (eg अस्ति) and कृ (eg करोति) where something becomes, is, or is made into something.

5. पुत्रा वीरा अभवन् ।

*________________________________________

6. तेन मुनिना कुक्कुरो व्याघ्रः कृतः ।

*________________________________________

7. अचलो महान् अस्ति ।

*________________________________________

**THE USES of the CASE ENDINGS (cont.)**

e The First Case is used in adding a विशेषण or title to a name. (Note:- this is true with all case endings , but is only mentioned here.)

8. रामो राजपुत्र आगच्छति ।

*________________________________________

9. विशालो गम्भीरः समुद्रो मत्स्यैः पूर्णः ।

*________________________________________

## II The Uses of the Second Case:

a The common and general use of the Second Case is in stating the object of an active sentence.

10. नृपः सेनामप्रैषयत् ।

*________________________________________

Note that in संस्कृत, position in the sentence does not necessarily reveal the object.

11. रामः सीतामलभत ।

*________________________________________

12. सीतां रामो ऽलभत ।

*________________________________________

b An aspect of the use of the second case to denote object is in stating the destination of a verb of motion.

13. कृष्णो ऽर्जुनमगच्छत् ।

* ________________________________________

14. तौ मुनीनचरताम् ।

*________________________________________

**THE USES of the CASE ENDINGS (cont.)**

c The Second Case may be used for a state or condition which is 'gone to', or 'fallen into'. So the English phrase 'he became angry' might in संस्कृत be expressed 'he went to angriness'. This 'abstract' form of a noun expressed in English by '-ness', '-ship', '-hood' etc, in संस्कृत usually has a final ' - त्वम् ' or ' - ता ' as in दीर्घत्वम् - longness or length, पितृत्वम् - fatherhood, राजता - kingship.

15. मुनिः शान्ततामगच्छत् ।

* ________________________________________

16. रावणः पञ्चत्वं गच्छेत् ।

*________________________________________

17. मूर्खः पण्डितत्वं गमिष्यति ।

*________________________________________

18. रामो दुःखं जगाम ।

*________________________________________

d Sometimes there are two words with a second case ending in a sentence.

19. सो ऽश्वं नगरमनयत् ।

* ________________________________________

20. खगो वचनमवदद्राजानम् ।

*________________________________________

22. जानामि त्वां प्रथमामात्यम् ।

*________________________________________

However, in the passive sentence one object is expressed in First Case but the other in the Second Case.

23. तेन नगरमश्वो नीयते ।

* ________________________________________

**THE USES of the CASE ENDINGS (cont.)**

e The Second Case is used with certain indeclinables. eg प्रति - towards, अभितः and परितः - around

24. राक्षसास्तमभितः ।

* ________________________________________

25. सेवका राजानं परितः स्थिताः ।

*________________________________________

## III The Uses of the Third Case.

a The Third Case carries the sense of 'by means of'. Thus the करण, the instrument, that brings about the action, is expressed in Third Case.

26. लक्ष्मणो हस्तेनाखादत् ।

* ________________________________________

27. तेन नृपः खड्गेन व्यापादितः ।

* ________________________________________

b The Third Case is used in the sense 'with', 'together with', especially with the word सह.

28. रामः सीतया सह वनेऽवसत् ।

* ________________________________________

29. त्वया सह वत्स्यामि वनेषु ।

*________________________________________

Note that the Third Case may have this sense of 'together with', even without a word such as सह.

30. बालकैरागच्छति ।

* ________________________________________

31. मित्रेण क्रीडामि ।

*________________________________________

**THE USES of the CASE ENDINGS (cont.)**

c Words such as रहित॰ हीन and विना meaning 'without' or 'devoid of' attract the Third Case

32. तेन रहितो ऽहं तत्र गमिष्यामि ।

* ________________________________________

33. स तत्र मित्रैर्हीनः ।

*________________________________________

d The Third Case is used with words such as अलम् 'enough' and पूर्ण 'filled'.

34. अलं वचनैर्भो सुहृत् ।

* ________________________________________

35. नौकाहारेण पूर्णा ।

*________________________________________

e In the Passive, Third Case is used for the Subject, कर्ता .

36. नगरं सैनिकेन दृश्यते ।

* ________________________________________

37. गृहं मया कृतम् ।

*________________________________________

38. त्वया गन्तव्यम् ।

* ________________________________________

f The Third Case sometimes has the sense of cause or reason for.

39. तेनापराधेन बालकः तुद्यते

* ________________________________________

40. दुःखेन ग्रामं त्यजामि ।

* ________________________________________

**THE USES of the CASE ENDINGS (cont.)**

g With किम् etc the Third Case has the sense of 'what use…' or purpose.

41. किं धनेन ।

* ________________________________________

42. किं मे जीवेन ।

*________________________________________

h A Third Case ending is often use to form an adverb.

eg सुखेन । with happiness, ie happily

eg उच्चैस् । loudly, raised

## IV The Uses of the Fourth Case.

a The Fourth Case is used for the person or purpose to which an action is dedicated.

43. स नदीं जलाय गतः ।

* ________________________________________

44. स वने शान्त्यै वसति ।

*________________________________________

45. पिता गृहं पुत्रेभ्यो ऽकरोत् ।

* ________________________________________

46. युद्धाय गच्छामि ।

* ________________________________________

b In the act of giving, and often of bowing, the recipient is stated in Fourth Case.

47. रामो बालकाय फलमददात् ।

* ________________________________________

**THE USES of the CASE ENDINGS (cont.)**

48. ॐ परमात्मने नमः ।

*________________________________________

49. तेभ्यो दानानि दास्यति ।

*________________________________________

50. दरिद्रेभ्यो धनं देहि ।

*________________________________________

51. देवेभ्यो नमो मया कृतम् ।

*________________________________________

Note that the word अर्थ° has the sense of the Fourth Case at the end of a compound.

52. ज्ञानार्थमागच्छामि ।

*________________________________________

c The Fourth Case can be used in the sense of 'leads to'.

52. सुखाय सत्यमस्ति ।

*________________________________________

## V The Uses of the Fifth Case.

a The Fifth Case is used mainly in the sense of 'away from'.

53. पत्रं वृक्षात्पतति ।

*________________________________________

54. अहमस्माद्वनाद्गन्तुमिच्छामि ।

*________________________________________

b Where there is fear 'from' something or protection 'from' something.

55. न भीतो मृत्योरस्मि ।

*________________________________________

**THE USES of the CASE ENDINGS (cont.)**

56. ज्ञानं नरान्दुःखाद्रक्षति ।

*________________________________________

c With directional words like दूरे बहिः पूर्वम् अन्य°.

57. नगराद्दूरे ।

* ________________________________________

58. गृहाद्बहिः ।

* ________________________________________

59. रात्रेः पूर्वम् ।

* ________________________________________

60. सुखादन्य आनन्दः ।

* ________________________________________

d To state the source of something.

61. स गुरोस्तज्जानाति ।

* ________________________________________

62. अज्ञानाद्दुःखमुद्भवति ।

*________________________________________

e As a way of saying 'because of' or 'due to'.

63. क्रोदात्स पुत्रमतुदत् ।

* ________________________________________

64. शान्त्याः स सुखेन जीवति ।

* ________________________________________

**THE USES of the CASE ENDINGS (cont.)**

65. अज्ञानादेवानेन नरेणापराधः कृतः ।

* ________________________________________

66. भयात्स नगरं गच्छति ।

* ________________________________________

f The Fifth Case is used with certain verbs such as विरमति - stops (from)

67. एतस्माद्विरमति ।

* ________________________________________

68. क्रोधाद्विरम ।

* ________________________________________

## VI The Uses of Sixth Case.

Note: The Sixth Case has many uses, and can be used to do the work of almost any Case. Unlike other Case endings it is not linked directly to the verb.

a The primary use is in the sense of joining or connection with another noun. It is the genitive case.

69. नृपस्य क्रोधं नावगच्छामः ।

* ________________________________________

70. एष रामस्य रथः ।

*________________________________________

b Since there is not a verb meaning 'to have' in संस्कृत, the Sixth Case is used.

71. रामस्य भार्यास्ति ।

* ________________________________________

**THE USES of the CASE ENDINGS (cont.)**

72. तस्य नित्यं शान्तिः ।

*________________________________________

c In the plural, the Sixth Case can have the sense of 'among'

73. स श्रेष्ठो वीराणामासीत् ।

* ________________________________________

74. नराणां रामो व्याघ्र इव ।

* ________________________________________

d The Sixth Case is used with words of direction such as अधः (under), अग्रे (on top, etc), उपरि (on top of), समीपे or °पम् (near to), बहिः and अन्तः.

75. जलं कुम्भस्यान्तः ।

* ________________________________________

76. अमात्यो राज्ञः समीपम् ।

* ________________________________________

77. गजस्योपरि राजोपाविशत् ।

* ________________________________________

e The Sixth Case is used with such words as कृते (for the sake of), लेशम् (a little of), समीपे and पूर्ण° (full of or filled with).

78. मम कृते स गच्छति ।

* ________________________________________

79. जलस्य लेशं देहि ।

* ________________________________________

**THE USES of the CASE ENDINGS (cont.)**

f Sometimes the Sixth Case is used to take the place of another Case with such words as प्रिय° (dear) and ज्ञातम् (known).

80. कस्तु राज्ञां प्रियः ।

* ________________________________________

81. अपि ज्ञातमेतत्तव ।

* ________________________________________

Note that 'his', 'her' and 'their' are not usually stated, but are understood and should be supplied in a translation.

82. पुत्रान्रक्षति ।

* ________________________________________

## VII The Uses of the Seventh Case.

a The Seventh Case indicates the place where something occurs. It is the locative case.

83. वन ऋषयो ध्यानमकुर्वन् ।

* ________________________________________

84. मत्स्याः नदीषु क्रीडन्ति ।

*________________________________________

b The Seventh Case indicates the time when something occurs.

85. रात्रौ सर्वं शान्तमस्ति ।

* ________________________________________

86. कस्मिंश्चिद्दिने ऽचलं गमिष्यामः ।

*________________________________________

**THE USES of the CASE ENDINGS (cont.)**

c In plural Seventh Case there may be the sense of 'among'

87. नरेषु रामः श्रेष्ठः ।

* ________________________________________

88. हनुमानचलेष्ववातरत् ।

* ________________________________________

d The Seventh Case is used for the person or thing to which an emotion is directed.

89. मातरि स्निह्यामि ।

* ________________________________________

90. रामे दशरथो ऽनुरज्यत ।

* ________________________________________

91. किमेव बालके ऽस्मिन्स्निह्यति मे मनः ।

* ________________________________________

92. मयि मा कुपितो भव ।

* ________________________________________

e With words like समर्थ° or क्षम° meaning 'capable' or 'skilful in', that in which there is the ability or skill is expressed in the Seventh Case.

93. एतस्मिन्गामने रामः समर्थः ।

* ________________________________________

94. युद्धशास्त्रयोः रामः क्षमः ।

* ________________________________________

**THE USES of the CASE ENDINGS (cont.)**

f Some क्तान्त words such as स्थित° (placed, situated) and गत° (gone to) have the sense of Seventh Case if they form the last part of a Compound.

eg मनगत - in the mind

95. नगरस्थितौ वृक्षौ पर्णरहितौ ।

* ________________________________________

96. स्वहस्तगतं फलं ते दास्यामि ।

* ________________________________________

g The Seventh Case has the sense of 'into' in some contexts.

97. वृक्षो नद्यां पतति ।

* ________________________________________

h The Seventh Case may have the sense of 'concerning' or 'in the matter of'.

98. धर्मे युद्धिष्ठिरः प्रथमस्तिष्ठति ।

* ________________________________________

i The Seventh Case is of course used in the सति सप्तमी construction.

99. रामे वनं गते भरतो राज्यमकरोत् ।

* ________________________________________

100. सैनिकेषु युद्धं गच्छत्सु बालका मार्गे क्रीडन्ति ।

* ________________________________________

*[At this point in the course, the study of chapters 2 & 3 of the Epic Civilisation material should be begun and **sanjñā** tested at appropriate stages.]*

## INDECLINABLE WORDS

An indeclinable word is one which does not take different endings due to number, case or gender. Before we receive two sheets of such words to learn, it is worth looking at how some of these indeclinable words are formed, especially in respect to their use as adverbs.

a) –तः This ending has the sense of the fifth case ie **from, away from.**

* ततः from that, therefore, after that
* कुतः from what? Why?
* यतः from which, since

b) -त्र This ending has the sense of the seventh case ie **in, a place.**

* अत्र Here
* तत्र There
* सर्वत्र Everywhere
* कुत्र Where?

c) –दा This ending has the sense of a **time**.

* तदा Then
* एकदा Once
* कदा When
* सर्वदा Always

*[The lists given on the following two pages show a selection of the most commonly used Indeclinable words. These should be learnt and tested, a column at a time. ]*

INDECLINABLE WORDS

| | |
|---|---|
| अचिरेण ,अचिरात् | Soon |
| अतः | Hence |
| अत्र | Here |
| अथ | Now, then |
| अद्य | Today |
| अधः | Beneath |
| अधुना | Now |
| अन्ततः | Finally |
| अपि | Also, even, even though, perhaps? |
| अलम् | Enough (+3rd) |
| इति | Thus |
| इव | Like, as if |
| इदानीम् | Now |
| इह | Here, in this situation |
| उपरि | On top (+6th) |
| एकदा | Once |
| एव | Only, indeed, just etc. (**immediately after the word it applies to**) |
| एवम् | Thus, such, in such a manner |
| किंतु | But |
| किम् | What, why? |
| कुत्र | Where? |
| क्व | Where? |
| च | And |
| चेत् | If |
| चिरम् | For a long time |
| चिरेण, चिरात् | After a while |
| ततः | Thereupon, therefore |
| तत्र | There |
| तथा | So, just so |
| तद् | Then |
| तदा | Then |
| तर्हि | Then |
| तस्मात् | Therefore |
| तावत् | So much, to such an extent |
| तु | However |
| दूरात् | From afar |

INDECLINABLE WORDS

| | |
|---|---|
| दूरे | Far away |
| न | Not |
| नाम | By name |
| नित्यम् | Always, ever |
| पुनः | Again |
| पुरा | Formerly, of old |
| प्रति | Towards |
| प्रायः | Probably |
| बहिः | Outside |
| भूयः | More, very much |
| भो | O |
| मन्दम् मन्दम् | Slowly |
| मा | Not, do not |
| यतः | Since |
| यत् यत् | Whatever |
| यत्र | Where |
| यत्र यत्र | Wherever |
| यथा | As, just as, according to … |
| यद् | Which, that |

| | |
|---|---|
| यदा | When |
| यदि | If |
| यावत् | As much as |
| वा | Or |
| विना | Without (+3$^{rd}$) |
| विशेषतः | Especially |
| शीघ्रम् | Quickly |
| श्वः | Tomorrow |
| सत्यम् | True |
| सदा | Always, ever |
| समीपम्, समीपे | Near to (+6$^{th}$) |
| सम्यक् | Perfectly, well |
| सर्वदा | Always, ever |
| सह | Together with |
| सहसा | Suddenly |
| साधु | Well done! |
| सुखेन | Easily |
| स्म | Indicates Past when used with a Present verb. |
| स्वयम् | One’s self, voluntarily etc |
| हा | Alas |
| हि | For, verily etc. |
| हे | O |
| ह्यः | Yesterday |

# METRE & STRESS

Syllables in संस्कृत are either **light** or with **weight**.

The following rules apply:

* **A short vowel is light.**

* **Before a conjunct consonant a vowel has weight.**
*[Note: Examples of conjunct consonants are* स्व त्र र्य स्म क्य *etc.]*

* **A long vowel has weight.**

The customary way of representing stressed and unstressed syllables is with an overhead 'u' for light and '-' for weight.
[NOTE: There is a slight pause after the eighth foot of each line in the Sloka (see below)]

e.g. तपः स्वाध्यायनिरतं / तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ / वाल्मीकिर्मुनिपुंगवम् ॥

Put stress marks in the following verse:

को न्वस्मिन्सांप्रतं लोके गुणवान्कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥

## THE ŚLOKA

The most common verse form or metre in संस्कृत is the श्लोकः.
Most of the **Mahābhārata**, **Rāmāyaṇa**, **Manusmṛti** and **Purāṇas** are in this metre.

The **Śloka** has 32 syllables, divided into two halves of 16 syllables, each of which is divided into two 8 syllable quarters.

In the above verse also put a pencil line through the quarter divisions.

## THE REPLACEMENT OF न् WITH ण् AND स् WITH ष्.

* A न् preceded in the same word by a र् or ष् or a ऋ is replaced by a ण् but only if there is nothing other than the following between the र्, ष् and the न् :

| | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| i.e. अट् | अ | आ | इ | ई | उ | ऊ | ऋ | ॠ | ऌ | ए | ओ | ऐ | औ |
| | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| | ह् | य् | व् | र् | | | | | | | | | |
| | 14 | 15 | 16 | 17 | | | | | | | | | |
| कुँ | क् | ख् | ग् | घ् | ङ् | and पुँ | प् | फ् | ब् | भ् | म् | | |
| | 18 | 19 | 20 | 21 | 22 | | 23 | 24 | 25 | 26 | 27 | | |

*[Note: There are also a small number of much more rarely occurring sounds that may stand between.]*

| | | |
|---|---|---|
| Thus, | रामेण | (with 2, 27,10 standing between) |
| | हरिणा | ( " 3 " " ) |
| | रामायणम् | ( " 2, 27, 2, 15, 1 " " ) |
| | गृहाणाम् | ( " 14, 2 " " ) |

Fill in the brackets for the following words.

| | |
|---|---|
| मित्राणि | ( " " " ) |
| ग्रामाणाम् | ( " " " ) |
| गृहाणि | ( " " " ) |
| ब्राह्मणः | ( " " " ) |

NB This does <u>not</u> happen when the न् is final (e.g. रामान्).

* A similar rule replaces a स् with a ष् after any इच् ( i.e. any vowel except अ or आ)

e.g. सीतासु, but रामेषु / आत्मसु, but हरिषु.
*[Note also मनःसु, but धनुःषु.]*

*[During term 3, during the translation of the Gītā verses to be found in the Literature Study Aid, the study and testing of the last two chapters of the Epic Civilisation should be completed.]*